Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १३ अङ्क : १५३
फेब्रुआरी - २०१९

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### एकं पदं भाषाशुद्धिं प्रति

पुण्यनामा श्रीमान् जनार्दनः हेगडे भाषाशुद्धिं प्रति नितरां चिन्तयति लिखति च । सः 'करङ्कः' पुस्तके लिखति – 'भाषाशुद्धिं विना न संस्कृतत्वम् । संस्कृतत्वपरिरक्षणं विना भाषाप्रसारकार्यं नाम देवं विक्रीय क्रियमाणः यात्रोत्सवः ।' अनेन वाक्येन ज्ञायते यत् भाषाशुद्धिविषये कियत् अवधानं करणीयम् । एतत् अवधानं सामान्येन करणीयं, विदुषा अपि । वैयाकरणेन करणीयम्, अन्यशास्त्रज्ञेन अपि । प्राध्यापकेन करणीयं, छात्रेण अपि । अत्र परिश्रमपराङ्मुखाः तर्कयेयुः –

**शास्त्रेषु नैपुणी येषां तेऽपि मुह्यन्ति कुत्रचित् ।**
**किं पुनः शिक्षमाणानां वाक्प्रपञ्चो विलक्षणः ॥**

किं शुद्धं किम् अशुद्धं वेति विवेचनं कष्टमेव । तथापि अभ्यासयोगेन अशुद्धिम् अल्पीकुर्वन् मनुष्यः शनैः शनैः शुद्धेः सामीप्यं प्राप्तुम् अर्हति । श्रीमान् हेगडेवर्यः भाषाशुद्धिसम्बन्धान् कांश्चन सामान्यान् अंशान् उपस्थापयति । यथा–

१. संस्कृतभाषासम्बद्धाः नियमाः ज्ञातव्याः । परन्तु अत्र स्मर्तव्यं यत् नियमज्ञानमात्रेण भाषाशुद्धिः न सिध्यति । नियमज्ञाः अपि दोषान् कुर्वन्ति । अतः नियमज्ञानेन सह शिष्टम् अध्ययनम् अपि अपेक्ष्यते ।

२. पदपदार्थसम्बन्धचिन्तनं कर्तव्यम् । अर्थात् यानि वाक्यानि अभिव्यज्यन्ते तेषु याः विभक्तयः प्रयुक्ताः ताः योग्ये स्थाने सन्ति किम् इति परिशीलनीयम् । पदस्य कारकं निश्चित्य प्रयुक्ता विभक्तिः स्थाने अस्ति किम् इति अवलोकनीयम् ।

३. शङ्किते स्थाने अवश्यमेव परिशीलनं कर्तव्यम् । कदाचित् अन्तःकरणात् कोऽपि सन्देशः लभ्यते यत् मया लिखितं शुद्धमेव । अस्मिन् अवसरे अपि प्रमादं परित्यज्य परिशीलनं करणीयम् एव ।

४. प्रारम्भे कोशग्रन्थादीनाम् अवलोकनं पुनः पुनः कर्तव्यं भवेत् । अत्र समयदाने सहनावहने वा कृपणता न आश्रणीया । मन्दया गत्या अग्रे सरणीयम् ।

५. आत्मना लिखिते सन्देहः जायते चेत् ग्रन्थाः परिशीलनीयाः । तत्रापि साफल्यं न प्राप्तं चेत् विदुषाम् उपसर्पणं चिन्तनीयम् ।

अनुसन्धानम् ७ पृष्ठे

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## संस्कृत-सम्भाषण-वर्गः
### प्रथमः स्तरः

- **Date** : 4/3/19 to 31/5/19
- **Day** : Monday-Wednesday-Friday
- **Time** : 6:30 pm to 8:00 pm
- **Fees** : 3000/-
- **Venue** : Eklavya Sanskrit Academy
  Core House,
  Opp. Apollo city centre
  Nr. Parimal Garden,
  Ahmedabad - 380006
- **Contact:** Dr. Mihir Upadhyay,
  Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Admission Open

**Value Education Through Sanskrit**

### बालसंस्कारकेन्द्रम्
**(Class SKg to 4)**

**Date** : 9/6/19 to 12/4/20
**Day** : Sunday
**Time** : 11.00am to 12.30pm
**Fees** : 4500/-

### बालसंस्कृतवर्गः
**(Class 5 to 8)**

**Date** : 9/6/19 to 12/4/20
**Day** : Sunday
**Time** : 11.00am to 12.30pm
**Fees** : 4500/-

**Venue:** Core House, Off CG Road, Ah'bad
**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006